तरं हि ते । कृत्स्नं स्वप्रचारेण पश्येद्दै विनिचेष्टितम् । स्वपन्नपि च जागर्त्ति चारचक्षुर्महीपतिः । विवस्वानिव तेजोभिर्नभस्वानिव चेष्टितैः । राजा चरैर्जगत् कृत्स्नं व्याप्नुयाल्लोकसम्मतैः । चारचक्षुर्नरेन्द्रः स्यात्सम्पतेत्तेन भूयसा । अनेनासम्पतन्नौद्धात्यतत्यन्वः सर्वेऽपि हि । सर्वसम्पत्समुदयं सर्वावस्थाविचेष्टितम् । चरेण द्विषतां विद्यात्तद्देशप्रार्थनानि च । प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधः स्मृतः । अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूत उच्यते । चरेण प्रचरेद्राजा स्थले वणिगिवाध्वरे । दूते सन्धानमायाते चरचर्य्या प्रतिष्ठिता । तीक्ष्णः प्रव्रजितश्चैव सत्री वनग एव च । एते ज्ञेयास्तु सञ्चाराः सर्वे नान्योन्यवेदिनः । संस्थानवत्यः संस्थाश्च कार्य्याः कार्य्यप्रसिद्धये । तिष्ठेयुः पार्श्वे सञ्चाराः परिचर्य्योपवादिनः । बालः कृषीवलो लिङ्गी भिक्षुकोऽध्यापकस्तथा । संस्थाः स्युश्चारसंस्थित्यै दत्तदायाः शुभाशयाः । सर्वस्मिंस्तत्र सञ्चारास्तिष्ठेयुश्चित्तवेदिनः । स्वपक्षे परपक्षे च यो हि वेद चिकीर्षितम् । जाग्रदपि सुषुप्तोऽसौ न भूपः प्रतिबुध्यते । कारणाकारणक्रुद्धान् बुध्येत स्वपरिग्रहे । पापानकारणक्रुद्धांस्तूष्णीं दण्डेन साधयेत् । ये तु कारणतः क्रुद्धास्तान् वशीकृत्य संवसेत् । शमयेद्दानमानाभ्यां छिद्रञ्च परिपूरयेत् । अणुनापि विजयते छिद्रेण बलवत्तरम् । निःशेषं मज्जयेद्राष्ट्रं पानपात्रमिवोदकम् । जडमूकान्धबधिरच्छद्मानः षण्डकास्तथा । किराता वामनाः कुब्जास्तद्विधा ये च कारकाः । भिक्षुकाश्चारणा दास्यो नानाकार्य्यकलाविदः । अन्तःपुरगतां वार्त्तामाहरेयुरलक्षिताः । छत्रव्यजनभृङ्गारयानवाहनधारिणः । महामात्रे बहिर्यातां विदुरन्ये च तद्विधाः । सूदव्यञ्जनकर्त्तारस्तल्पका व्ययकास्तथा । प्रसाधका भोजकाश्च गात्रसंवाहका अपि । जलताम्बूलकुसुमगन्धभूषणदायकाः । कर्त्तव्याश्च सदा ह्येते ये चान्येऽभ्यासवर्त्तिनः । सञ्ज्ञाभिर्मूर्च्छितैर्लेख्यैराकारैरिङ्गितैरपि । सञ्चरेयुरव्यग्राश्चराश्चर्य्यां परस्परम् । समापिबन्तो जगतां मतानि जलानि भूमेरिव सूर्य्यपादाः । अनेकशिल्पाध्ययनप्रवीणाश्चराश्चरेयुर्बहुलिङ्गरूपाः । येन प्रकारेण परानुमेयात् परापरज्ञस्य समृद्धिहेतोः । तमात्मनि स्वस्थमतिस्तु तज्ज्ञैर्वियुज्यमानं परतो हि विद्यात्" । २प्रेष्यमात्रे त्रि० ततः भावे कर्मणि च "दूतवणिग्भ्याञ्च पा० यत् । दूत्य तद्भावे तत्कर्मणि च "दूत्यं तद्भावकर्मणोः" अमरः । कामन्द० वाक्ये उदा० ष्यञ् दौत्य तत्रार्थे "न प्रयाति च दौत्येन" हितो० "द्विषां हृदैर्दौत्यपथः सितीकृतः" नैष० । लिङ्गविशिष्टपरिभाषया दूतीशब्दादपि यत् ष्यञ् च । दूत्य दौत्य दूतीनां कर्मणि भावे च । स्वार्थे क । दूतक तत्रार्थे स्त्रियां कापि अत इत्त्वम् दूतिका दूत्याम् । भावे क्त । ४उपतापे न० । [पुष्प्यां शब्दच० ।

**दूतघ्नी** स्त्री दूतं खेदं हन्ति हन–टक् ङीप् । कदम्ब-

**दूति** स्त्री दु–बा० ति दीर्घश्च उज्ज्वलद० । प्रेषणायां स्त्रियां "तां कामिनो दूतिमुदाहरन्ति" वर्णविवेकः वा ङीप् दूती तत्रार्थे "उत्तिष्ठ दूति ! यामो यामो यातस्तथापि नायातः" सा०द० "रतिदूतिपदेषु कोकिलाम्" कुमा० "प्रतिकृतिरचनाभ्यो दूतिसंदर्शिताभ्यः" "तेन दूतिविदितं निषेदुषा" रघुः दूतीभेदलक्षणे सा०द०उक्ते "दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी । बाला प्रव्रजिता कारुः शिल्पिन्याद्याः स्वयं तथा । कला कौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः । माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः । एता अपि यथौचित्यादुत्तमाधममध्यमाः"

**दून** पु० दु–उपतापे क्त "दुग्वोर्दीर्घश्च" पा०तस्य नः दीर्घश्च । मुग्ध० दू–खेदे ओदित्त्वात् तस्य नः । १अध्वश्रान्ते २उपतप्ते ३दुःखिते च "पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस !" नैष० ।

**दू(र्)** स्त्री दैप् शुद्धौ बा० क्रू । प्राणरूपे देवताभेदे "सा वा एषा देवता दूर्नाम दूरं ह्यस्या मृत्युर्दूरं ह वा अस्मान्मृत्युर्भवति य एवं वेद" शत०ब्रा० १४।४।१० "उपासकशरीरस्था प्राणरूपा देवता दूर्नाम दूरित्येवं ख्याताऽतः शुद्धा" भा०अत्र शुद्धेति विशेषणात् दैपधातो रूपमिति सूचितम् । ब्राह्मणे तु दूरसम्बन्धात् तत्सिद्धिरुक्ता तथा च दूरं करोति मृत्युमुपासकस्य दूर+तत्यर्थे णिच् बा० न टवादेशः क्विप् णिलोपः रान्तोऽयमिति तु युक्तम् ।

**दूर** त्रि० दुर्+इण–"दुरीणो लोपश्च" उणा० रक् धातो रिकारलोपे रेफे परे पूर्वाणो दीर्घः । १विप्रकृष्टे महता अन्तरेण स्थिते दैशिकपरत्वयुक्ते अमरः । "दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते" भाषा० "दूरत्वमन्तिकत्वञ्च दैशिकं परत्वमपरत्वं बोध्यम् तद्बुद्धेरसाधारणं वीजं दिगेव" सि०मुक्ता० अतिदूरत्वञ्च प्रत्यक्षं नोत्पादयति यथाह